# পশুপত্যাষ্টকং

{॥ পশুপত্যাষ্টকং ॥}

ধ্যানম্ ।

ধ্যায়েন্নিত্যং মহেশং রজতগিরিনিভং চারুচন্দ্রাবতংসং

রত্নাকল্পোজ্জ্বলাঙ্গং পরশুমৃগবরাভীতিহস্তং প্রসন্নম্ ।

পদ্মাসীনং সমন্তাৎস্তুতমমরগণৈর্ব্যাঘ্রকৃত্তিং বসানং

বিশ্বাদ্যং বিশ্ববীজং নিখিলভয়হরং পঞ্চবক্ত্রং ত্রিনেত্রম্ ॥

স্তোত্রম্ ।

পশুপতীন্দুপতিং ধরণীপতিং ভুজগলোকপতিং চ সতী পতিম্ ॥

গণত ভক্তজনার্তি হরং পরং ভজত রে মনুজা গিরিজাপতিম্ ॥ ১॥

ন জনকো জননী ন চ সোদরো ন তনয়ো ন চ ভূরিবলং কুলম্ ॥

অবতি কোঽপি ন কালবশং গতং ভজত রে মনুজা গিরিজাপতিম্ ॥ ২॥

মুরজডিণ্ডিবাদ্যবিলক্ষণং মধুরপঞ্চমনাদবিশারদম্ ॥

প্রথমভূত গণৈরপি সেবিতং ভজত রে মনুজা গিরিজাপতিম্ ॥ ৩॥

শরণদং সুখদং শরণান্বিতং শিব শিবেতি শিবেতি নতং নৃণাম্ ॥

অভযদং করুণা বরুণালযং ভজত রে মনুজা গিরিজাপতিম্ ॥ ৪॥

নরশিরোরচিতং মণিকুণ্ডলং ভুজগহারমুদং বৃষভধ্বজম্ ॥

চিতিরজোধবলী কৃত বিগ্রহং ভজত রে মনুজা গিরিজাপতিম্ ॥ ৫॥

মুখবিনাশঙ্করং শশিশেখরং সততমঘ্বরং ভাজি ফলপ্রদম্ ॥

প্রলযদগ্ধসুরাসুরমানবং ভজত রে মনুজা গিরিজাপতিম্ ॥ ৬॥

মদম পাস্য চিরং হৃদি সংস্থিতং মরণ জন্ম জরা ভয পীডিতম্ ॥

জগদুদীক্ষ্য সমীপভযাকুলং ভজত রে মনুজা গিরিজাপতিম্ ॥ ৭॥

হরিবিরিঞ্চিসুরাধিংপ পূজিতং যমজনেশধনেশনমস্কৃতম্ ॥

ত্রিনযনং ভুবন ত্রিতযাধিপং ভজত রে মনুজা গিরিজাপতিম্ ॥ ৮॥

পশুপতেরিদমষ্টকমদ্ভুতং বিরিচিত পৃথিবী পতি সূরিণা ॥

পঠতি সংশৃনুতে মনুজঃ সদা শিবপুরিং বসতে লভতে মুদম্ ॥ ৯॥

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Pashupati Ashtakam Lyrics in Bengali PDF
% File name : pashu8.itx
% Category : aShTaka
% Location : doc_shiva
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Latest update : November 1, 2010
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website